नेष्ट्रा गृहपतिसंज्ञकेन सप्तदशसंख्यापूरकेण सहिता द्वादशाहादिसत्रार्थं दीक्षित्वा स्वस्वसम्बन्धिनोऽग्नीनेकत्र स्थापयित्वा तत्प्रधानाः सत्राण्युपतिष्ठेयुः इति” भाष्यम् । “यदच्छावाकमनुसन्तिष्ठते इति” ता० ब्रा० । अच्छावाकशब्दोऽस्त्यत्र छ । अच्छावाकीयम् तच्छब्दयुक्ते सूक्तभेदे, तच्च सूक्तम् ”अच्छावाक ! वदस्वेत्युक्तोऽच्छा वो अग्निमवस इति तृचमन्वाहेत्यादिना” दर्शितम् । अच्छावाकस्येयम् यत् । अच्छावाक्या । अच्छावाकर्त्विक्-पाठ्यायामृचि । “एषा होत्रा यदच्छावाक्या” इति ता० ब्रा० । “अच्छावाक्या अच्छावाकसम्बन्धिनी होत्राशंसनरूपा क्रियेति” तद्भाष्यम् ।

**अच्छावाकसामन्** न० अच्छावाकेन गेयं साम । “य एक इद्धिदयत इति तृचे गेये सामभेदे एतस्यैव नामान्तरमुद्वंशीयमिति” “त्रैककुभं चोद्वंशीयञ्चान्ततः प्रतिष्ठाप्ये इति” ताण्ड्य० ब्रा० । “त्रैककुभं ब्रह्मसाम भवति, उद्वंशीयमच्छावाकसामेति, “य एक इद्धिदयते इति” तृचे गेयं साम उद्वंशीयमेते सामनी इति” तद्भाष्यम् ।

**अच्छावाकीय** न० अच्छावाकस्य ऋत्विग्भेदस्य कर्म्म भावो वा “होत्राभ्य” इति छ । शंसनरूपे अच्छावाककर्म्मणि, तद्भावे च ।

**अच्छिद्र** त्रि० न छिद्रं तत्तत्कार्य्येषु प्रमादादिना स्खलनं, रन्ध्रं वा यत्र । प्रमादादिना स्खलनरहिते । “अच्छिद्रेण विचेतव्या देशाः सगिरिकन्दरा” इति रा० । “यच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम अच्छिद्रमस्तु तत्सर्वमिति” “अच्छिद्रं तु भवत्वेतत् सर्वेषाञ्च शिवाय नः” इति च पुरा० । “तत्तथा क्रियतां राजन् यथाऽच्छिद्रः क्रतुर्भवेदिति” भार० । रन्ध्ररहिते च ।

**अच्छिन्न** त्रि० छिद-भावे क्त न० ब० । खण्डनरहिते, छेदनरहिते, सन्तते च “वसुधारां प्रकुर्वीत अच्छिन्न घृतधारयेति” पुरा० । कर्मणि क्त न० त० । छिन्नभिन्ने त्रि० ।

**अच्छिन्नपत्र** पु० अच्छिन्नं सन्ततं पत्रमस्य । शाखोटकवृक्षे सन्ततपत्रयुक्तवृक्षमात्रे च । अच्छिन्नपर्णादयोऽप्यत्र ।

**अच्छेदिक** त्रि० छेदनं नार्हति ठन् । छेदनानर्हे ।

**अच्छेद्य** त्रि० न छेत्तुमर्हति छिद—अर्हार्थे कर्म्मणि यत् । छेदनानर्हे । आत्मनि पु० “अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति” गीता । आत्मनश्च अवयवाभावात् अवयवद्वैधीकरणरूपच्छेदनानर्हत्वात् तथात्वम् ।

**अच्छोद** न० अच्छं निर्म्मलमुदकं यस्य उदादेशः । हिमालयप्रदेशस्थे कादम्बरीप्रसिद्धे सरोवरभेदे । “आह्लादनं दृष्टैः, अच्छोदं नाम सरो दृष्टवानिति” काद० । नदीभेदे स्त्री । अग्निष्वात्तादीन् प्रक्रम्य, “एतेषां मानसी कन्या अच्छोदा नाम निम्नगा” इति पुरा० ।

**अच्युत** पु० स्वरूपसामर्थ्यान्न च्युतो न च्यवते न च्यविष्यते वा च्यु—कालसामान्ये कर्त्तरि क्त न० त० । परमेश्वरे “शाश्वतं शिवमच्युतमिति” श्रुतिः । “यस्मान्न च्युतपूर्व्वोऽहमच्युतस्तेन कर्म्मणेति” भगवद्वाक्यम् । “तेन च्युत्यभावरूपप्रवृत्तिनिमित्तेने”त्यानन्दगिरिः । तदवतारभेदे वासुदेवे “इयमच्युतलीलाढ्या सद्वृत्ता जातिशालिनीति” छन्दोमञ्जरी अच्युतस्य लीला अच्युता अभ्रष्टा लीला च । षड्भावविकाररहिते च “अच्युतः प्रथितः प्राण” इति सहस्रनामभाष्ये तथैव व्याख्यातम् । नारायणे च “गरुडमूर्त्तिरिवाच्युतस्थितिरमणीयेति” काद० । अच्युतस्य विष्णोः स्थितिः अच्युता अचञ्चला च स्थितिरिति तदर्थः । चलनरहिते अभ्रष्टे स्थिरे त्रि० । “अक्षितमसि अच्युतमसीति” वेदः । द्वादशसर्गयुक्ते काव्यभेदे पु० हेमचन्द्रः । न च्योतति क्षरति च्युत—क न० त० । क्षरणशून्ये त्रि० ।

**अच्युताग्रज** पु० अच्युतस्य वासुदेवस्य उपेन्द्रस्य वा अग्रजः ६ त० । बलदेवे । वसुदेवाज्जन्मकाले बलदेवस्य ततोऽग्रजननात् तथात्वम् । इन्द्रे । कश्यपाज्जन्मकाले च अदित्यामग्रोत्पन्नत्वात् तस्य तथात्वमिति भेदः । तयोश्च तदग्रजत्वं सङ्कर्षणशब्दे इन्द्रावरजशब्दे च वक्ष्यते ।

**अच्युताङ्गज** पु० अच्युतस्य वासुदेवस्य अङ्गजः । कृष्णपुत्त्रे प्राधान्यात् कामदेवे । [जात इति भा० १० स्कन्धे ।

**अच्युतात्मज** पु० ६ त० कामदेवे । स हि रुक्मिण्यां कृष्णात्

**अच्युतावास** पु० अच्युतेन ओष्यतेऽत्र आ—वस—आधारे घञ् ६ त० । अश्वत्थवृक्षे । “अश्वत्थः सर्ववृक्षाणामि”त्युक्तेस्तस्य तत्रोपस्थत्वात्सदावासत्वम् । [च्युतिशून्ये त्रि० ।

**अच्युति** स्त्री च्यु—क्तिन् न० त० । क्षरणाभावे । बहु० ।

**अज** गतौ क्षेपणे च भ्वादि० पर० सक० सेट् । अजति । अवैषीत्—आजीत् । तृच् अजिता—वेता । घञ् । आजः । “अजन्ति वह्निं सदनान्यच्छ” इति वेदः ।

**अज** दीप्तौ इदित् चुरादि० उभय० सेट् अक० । अञ्जयति ते । आञ्जिजत् त ।

**अज** पु० न जायते जन ड न० त० । ईश्वरे, “न जातो न जनिष्यते” इति श्रुतेः “न हि जातो न जायेऽहं न जनिष्ये कदाचन । क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः”